SHILLY-SHALLY, *s.* विकल्पः, अस्थिरता, चापल्यं. *See* IRRESOLUTION.

SHIN, *s.* जङ्घाग्रभागः, जङ्घायाः पूर्व्वास्थि *n.*, अग्रजङ्घा.

*To* SHINE, *v. n.* प्रकाश् (c. 1. -काशते -शितुं, c. 4. -काश्यते), काश्, द्युत् (c. 1. द्योतते -तितुं), विद्युत्, राज् (c. 1. राजति -ते -जितुं), अभिराज्, अभिविराज्, दीप् (c. 4. दीप्यते -पितुं), स्फुर् (c. 6. स्फुरति -रितुं), शुभ् (c. 1. शोभते -भितुं), विशुभ्, भास् (c. 1. भासते -सितुं), आभास्, प्रभास् अवभास्, भा (c. 2. भाति -तुं), प्रभा, आभा, विभा, उद्भा, चकास् (c. 2. चकास्ति -सितुं), रुच् (c. 1. रोचते -चितुं), ज्वल् (c. 1. ज्वलति -लितुं), उज्ज्वल्, वर्चस् (nom. वर्चायते), ओजस् (nom. ओजायते); 'to shine very brightly,' दीप् in freq. (देदीप्यते), ज्वल् in freq. (जाज्वल्यते), शुभ् in freq. (शोशुभ्यते), अतितेजसा प्रकाश्; 'the fixed stars shine by their own light,' नक्षत्राणि स्वप्रकाशानि भवन्ति; 'planets shine by reflected light,' ग्रहाः परावृत्तकिरणैर् प्रकाश्यन्ते.

SHINE, *s.* प्रभा, प्रकाशः, द्युतिः *f.*, तेजस् *n.* *See* SUN-SHINE.

SHINGLE, *s.* (Gravel, pebble) शर्करा, शिलाखण्डः, वर्त्तुलशिला, वेलाहतशिला, वेलाहतशर्करा.—(Thin plank) फलकः.

SHINING, *part.* or *a.* प्रकाशमानः -ना -नं, दीप्तिमान् -मती -मत् (त्), द्युतिमान् &c., द्योती -तिनी -ति (न्), द्योतमानः -ना -नं. विद्योतमान &c., शोभमानः &c., देदीप्यमानः &c., विराजमानः &c., प्रभावान् &c., कान्तिमान् &c., तेजस्वी &c., भास्वान् &c., भास्वरः -री -रं, भास्करः -रा -रं, प्रकाशन् -शन्ती -शत् (त्), स्फुरन् &c., भासयन् &c., प्रकाशः -शा -शं, प्रकाशी &c., काशी &c., काशिष्णुः -ष्णुः -ष्णु. *See* BRIGHT.

SHINY, *a.* दीप्तिमान् -मती -मत् (त्), तेजोमयः -यी -यं. *See* BRIGHT.

SHIP, *s.* वृहन्नौका, वृहन्नौः *f.*, वृहत्तरणी, नौः *f.*, नौका, वृहत्पोतः, पोतः, तरणिः -णी *f.*, अर्णवयानं, जलयानं, अर्णवपोतः, वोहित्थं, मद्गुः *m.*, प्लवः; 'to take ship,' नौकाम् आरुह् (c. 1. -रोहति -रोढुं); 'ship of war,' युद्धनौः *f.*, युद्धनौका.

SHIP, an affix denoting abstract state or office is rendered by ता or त्वं; as, 'a judge,' धर्म्माध्यक्षः; 'judgeship,' धर्म्माध्यक्षता -त्वं; 'a son,' पुत्रः; 'sonship,' पुत्रता -त्वं.

*To* SHIP, *v. a.* (Put on board ship) नौकाम् आरुह् in caus. (-रोपयति -यितुं) or प्रविश् (c. 10. -वेशयति -यितुं), नौकायां निविश् or सम् in caus.—(Fix in its place) स्वस्थाने धा or रुह् in caus., स्वस्थानीकृ.

SHIP-MASTER, *s.* नौकापतिः *m.*, नौस्वामी *m.* (न्), नौकास्वामी *m.*, नौकाधिपतिः.

SHIPMENT, *a.* नौकारोपणं, नौकाप्रवेशनं, नौकासमर्पणं.

SHIPPING, *s.* नौकासमूहः, नौकादिसमूहः नौकासमवायः, नाविकं.

SHIP-WRECK, *s.* नौभङ्गः, नौकाभङ्गः, नौभेदः, नौकानाशः, नौव्यसनं नौकाव्यसनं, नौकामज्जनं.—(Destruction) नाशः, विनाशः.

*To* SHIP-WRECK, *v. a.* नौकां भञ्ज् (c. 7. भनक्ति, भंक्तुं) or भिद् (c. 7. भिनत्ति, भेत्तुं) or नश् (c. 10. नाशयति -यितुं) or विनश्, नौभङ्गं कृ, नौभेदं कृ, नौव्यसनं कृ or जन्, उत्कूल् (c. 10. -कूलयति -यितुं), कूलोपरि क्षिप्.

SHIP-WRECKED, *p. p.* भिन्ननौकः -का -कं, भग्ननौकः &c., उत्कूलितः -ता -तं, कूलोपरि क्षिप्तः -प्ता -प्तं, सैकतोपरि क्षिप्तः &c.

*To* SHIRK, *v. a.* or *n.* छलेन कर्त्तव्यतां त्यज् or परिहृ or हा, छलेन पलाय् (c. 1. पलायते -यितुं, rt. इ) or व्यपदिश् (c. 6. -दिशति-देष्टुं), छलं कृ, छद्म कृ, व्यपदेशं कृ, अपदेशं कृ, अपसृप्, व्यपसृप्, अपक्रम् अपधाव्.

SHIRK, SHIRKER, *s.* कर्त्तव्यत्यागी *m.* (न्). कर्त्तव्यतात्यागी *m.*, छद्मकारी *m*

SHIRT, *s.* अन्तरीयं, अधोवस्त्रं, अधोवसनं, अधोंशुकं, अन्तर्वस्त्रं, अन्तर्वसनं, क्षौमवस्त्रं, क्षौमवसनं, क्षौमाम्बरं.

*To* SHIVER, *v. a.* शतखण्डशः कृ or भिद्, सूक्ष्मखण्डशो भिद्, शतखण्डीकृ, सहस्रखण्डशो भञ्ज्, शतचूर्णीकृ, चूर्णीकृ, चूर्ण्, निष्पिष्. *See To* SHATTER, *v. a.*

*To* SHIVER, *v. n.* (Fall or be broken into many small pieces) सहस्रखण्डशो भिद् in pass. or पत्, शतखण्डशो भिद् in pass., शतचूर्णीभू.—(Quake or shake with cold, &c.) शीतार्त्तत्वात् कम्प् (c. 1. कम्पते -म्पितुं) or विकम्प् or प्रकम्प्. हिमार्त्तत्वाद् वेप् (c. 1. वेपते -पितुं) or प्रवेप्, सीत्कारं कृ, शीत्कारं कृ.

SHIVER, *s.* (Small fragment) सूक्ष्मखण्डः -ण्डकः, भित्तिः *f.*, शकलः -लं, छेदः, दलं, छिन्नं, भिन्नं; 'into shivers,' सहस्रखण्डशः, सूक्ष्मखण्डशः.—(Shaking) कम्पः, सीत्कारः, *see* SHIVERING, *s.*

SHIVERED, *p. p.* सहस्रखण्डशो भिन्नः -न्ना -न्नं, सूक्ष्मखण्डशो भिन्नः &c., शतखण्डीकृतः -ता -तं, छिन्नभिन्नः &c., चूर्णितः &c.. जर्ज्जरः -रा -रं.

SHIVERING, *s.* (The act of shattering) सहस्रखण्डशो भेदः -दनं, शतखण्डीकरणं, शतचूर्णीकरणं, चूर्णीकरणं, निष्पेषः -षणं.—(Quaking, trembling with cold, &c.) शीतार्त्तत्वात् or शीताविष्टत्वात् कम्पः or कम्पनं, विकम्पः -म्पनं, शरीरकम्पः, देहकम्पः, अङ्गकम्पः, वेपनं, वेपथुः *m.*, सीत्कारः, शीत्कारः, सीत्कृतं.

SHIVERING, *part.* (As with cold) कम्पमानः -ना -नं, विकम्पमानः &c., कम्पनः -ना -नं, कम्पान्वितः -ता -तं, वेपमानः -ना -नं, कम्पितः -ता -तं.

SHOAL, *s.* (A shallow) सैकतं, पुलिनं, कूलं, गाधभूमिः *f.*, उत्तानभूमिः *f.* —(Crowd) सङ्घः, सङ्घातः, समूहः; 'of fish,' मत्स्यसङ्घातः, मत्स्यसङ्घः, पोताधानं.

SHOCK, *s.* (Concussion) क्षोभः, विक्षोभः, संक्षोभः, संघट्टः -ट्टनं, आकस्मिकक्षोभः, आघातः, व्याघातः.—(Impression of terror or disgust) त्रासावेशः, बीभत्सावेशः.—(Pile of sheaves) शस्यस्तम्बोत्करः, शस्यस्तम्बकर्चितिः *f.* -राशिः *m.*

*To* SHOCK, *v. a.* (Shake by sudden collision) क्षुभ् (c. 10. क्षोभयति -यितुं), विक्षुभ्. संक्षुभ्, अकस्मात् क्षुभ्, संघट्ट् (c. 10. -घट्टयति -यितुं). आकस्मिकक्षोभं कृ.—(Strike with sudden terror or disgust) आकस्मिकत्रासं कृ or जन् (c. 10. जनयति -यितुं), आकस्मिकसाध्वसं कृ or जन्, बीभत्सं कृ or जन्, दारुण्यं कृ or जन् or उत्पद् in caus., भैरवं जन्.—(Pile sheaves) शस्यस्तम्बान् राशीकृ.

SHOCKED, *p. p.* (Struck with sudden horror) आकस्मिकत्रासोपहतः -ता -तं, साध्वसोपहतः &c., अकस्मात् साध्वसोपहतः &c. or बीभत्सोपहतः &c.

SHOCKING, *a.* आकस्मिकत्रासदः -दा -दं, आकस्मिकत्रासकरः -रा -रं, साध्वसकारी -रिणी -रि (न्), त्रासजनकः -का -कं, बीभत्सकरः -रा -रं.

SHOD, *p. p.* सपादुकः -का -कं, उपपादुकः -का -कं, पादुकायुक्तः -क्ता -क्तं, सपादत्रः -त्रा -त्रं, उपानद्युक्तः -क्ता -क्तं, उपानद्धद्धः -द्धा -द्धं, उपानद्गूढः &c.

SHOE, *s.* पादुका, पादत्रं, उपानत् *f.* (ह्), पादूः *f.*, पादपा, पादत्राणं, पादरक्षा, चरणत्राणं, प्राणिहिता, वध्रं, पादबन्धनं; 'of a horse,' खुरत्रं, खुरत्राणं.

*To* SHOE, *v. a.* पादुकायुक्तं -क्तां कृ, सपादुकं कां कृ, उपानद्युक्तं -क्तां कृ. पादुकाबन्धनं कृ, पादुकां बन्ध् (c. 9. बध्नाति, बन्द्धुं).

SHOE-BLACK SHOE-CLEANER, *s.* पादुकामार्जकः, पादुकासम्मार्जकः, पादुकामार्ज्जः

SHOELESS, *a.* पादुकाहीनः -ना -नं, अपपादत्रः -त्रा -त्रं, निष्पादुकः -का -कं.

SHOE-MAKER, *s.* पादुकाकारः, पादुकाकृत् *m.*, पादूकृत् *m.*, पादुकृत् *m.* चर्म्मकारः -रकः. चर्म्मकृत् *m.*, चर्म्मकारी *m.* (न्), चर्म्मारः; 'shoemaker's knife,' चर्म्मप्रभेदिका, आरा.